# Shivaproktam Annapurna Ashtottarashatanama Stotram

# શિવપ્રોક્તં અન્નપૂર્ણા અષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Shivaproktam Annapurna Ashtottarashatanama Stotram

File name : shivaproktaMannapUrNAaShTottarashatanAmastotram.itx

Category : devii, shivarahasya, aShTottarashatanAma, stotra

Location : doc_devii

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam | 628-645||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 20, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તં અન્નપૂર્ણા અષ્ટોત્તરશતનામસ્તોત્રમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
શિવઃ ઉવાચ
અસ્ય શ્રીઅન્નપૂર્ણાષ્ટોત્તરશતનામમન્ત્રસ્ય પરમાત્મા
સદાશિવોઽહં ઋષયઃ(ષિઃ) અનુષ્ટુપ્ છન્દઃ,
અન્નપૂર્ણા દેવતા, સ્વધા બીજં, સ્વાહા શક્તિઃ
હ્રીં કીલકમ્ । સર્વાભીષ્ટસિદ્ધિઃ ફલ
શ્રીઅન્નપૂર્ણાપ્રીત્યર્થે જપે વિનિયોગઃ ।

ૐ અન્નપૂર્ણાદિવા(મા)દેવી શ્રીમા(શ્રીર્મા)પુષ્ટિઃ સરસ્વતી । (ભીમાપુષ્ટિઃ)
સર્વજ્ઞા પાર્વતી દુર્ગા શિવાની શિવવલ્લભા ॥ ૬૨૮॥

વેદવિદ્યા મહાવિદ્યા વિદ્યાધાત્રી વિશારદા ।
કુમારી યુવતી બાલા લક્ષ્મીઃ શ્રીર્ભયહારિણી ॥ ૬૨૯॥

ભવાની વિષ્ણુજનની બ્રહ્માદિજનની પરા ।
ગણેશજનની શક્તિઃ કુમારજનની શુભા ॥ ૬૩૦॥

ભાગ્યાશ્રયા ભગવતી ભક્તાભીષ્ટપ્રદાયિની ।
ભવરોગહરા ભવ્યા સુભ્રૂઃ પરમમઙ્ગલા ॥ ૬૩૧॥

શર્વાણી ચઞ્ચલાપાઙ્ગી(ઙ્ગા) ચારુચન્દ્રકલાધરા ।
વિશાલાક્ષી વિશ્વમાતા વિશ્વવન્દ્યા વિલાસિની ॥ ૬૩૨॥

આર્યા કલ્યાણનિલયા રુદ્રાણી કમલાસના ।
શુભપ્રદા શુભા વાર્તા વૃત્તપીનપયોધરા ॥ ૬૩૩॥

અમ્બા સંસારમથની મૃજની સર્વમઙ્ગલા ।
વિષ્ણુસંસેવિતા શુદ્ધા બ્રહ્માદિસુરસેવિતા ॥ ૬૩૪॥

પરમાનન્દદા શાન્તિઃ પરમાનન્દરૂપિણી ।
પરમાનન્દજનની પરમાન્નપ્રદાયિની ॥ ૬૩૫॥

પરોપકારનિરતા પરમા ભક્તવત્સલા ।
પૂર્ણચન્દ્રાભવદના પૂર્ણચન્દ્રનિભાંશુકા ॥ ૬૩૬॥

શુભલક્ષણસમ્પન્ના શુભાનન્તગુણાર્ણવા ।
શુભસૌભાગ્યનિલયા શુભાચારરતપ્રિયા ॥ ૬૩૭॥

ચણ્ડિકા ચણ્ડમથની ચણ્ડદર્પનિવારિણી ।
ચણ્ડમાર્તાણ્ડનયના ચન્દ્રાગ્નિનયના સતી ॥ ૬૩૮॥

પુણ્ડરીકપુરા પુણ્યા પુણ્યદા પુણ્યરૂપિણી ।
પુણ્યજ્ઞેયા પુણ્યવન્દ્યા પુણ્યમૂર્તિઃ પુરાતના ॥ ૬૩૯॥

અનવદ્યા વેદવેદ્યા વેદવેદાન્તરૂપિણી ।
માયાતીતા સૃષ્ટમાયા સૃષ્ટધર્માત્મવન્દિતા ॥ ૬૪૦॥

અસૃષ્ટા સઙ્ગરહિતા સૃષ્ટિહેતુઃ કપર્દિની ।
વૃષારૂઢા શૂલહસ્તા સ્થિતિસંહારકારિણી ॥ ૬૪૧॥

મન્દસ્મિતા શુદ્ધરૂપા શુદ્ધચિત્તમુનિસ્તુતા ।
મહાભાગપતી દક્ષા દક્ષાધ્વરવિનાશિની ॥ ૬૪૨॥

અપર્ણાઽનન્યશરણા ભક્તાભીષ્ટફલપ્રદા ।
નિત્યસુન્દરસર્વાઙ્ગી સચ્ચિદાનન્દલક્ષણા ॥ ૬૪૩॥

નામ્નામષ્ટોત્તરશતમમ્બાયાઃ પુણ્યકારણમ્ ।
સર્વસૌભાગ્યસિધ્યર્થં જપનીયં પ્રયત્નતઃ ॥ ૬૪૪॥

ઇદં સ્વસ્ત્યયનં ધન્યં મહાપાતકનાશનમ્ ।
સર્વાભીષ્ટપ્રદં પુણ્યં નિત્યમઙ્ગલદાયકમ્ ॥ ૬૪૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપ્રોક્તં અન્નપૂર્ણા અષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૯ શિવગૌરીસંવાદે કાશીપ્રભાવકથનમ્ । ૬૨૮-૬૪૫॥

Also annapUrNAShTottarashatanAmastotram is similar

॥ ઇતિ શ્રીબ્રહ્મોત્તરખણ્ડે આગમપ્રખ્યાતિશિવરહસ્યે
શ્રીઅન્નપૂર્ણાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam . 628-645..

Notes:
Śiva શિવ reveals (to Nandī નન્દી), the Annapūrṇā AṣṭottaraśatanāmaStotram અન્નપૂર્ણા અષ્ટોત્તરશતનામસ્તોત્રમ્. The chapter further has instructions about the procedure for reciting the same.
Śivaproktaṃ Annapūrṇā AṣṭottaraśatanāmaStotram શિવપ્રોક્તં અન્નપૂર્ણા અષ્ટોત્તરશતનામસ્તોત્રમ્ is preceded by Annapūrṇā Stutiḥ અન્નપૂર્ણા સ્તુતિઃ; the link to which can be found below.

Proofread by Ruma Dewan

---

*Shivaproktam Annapurna Ashtottarashatanama Stotram*
pdf was typeset on June 20, 2024

Please send corrections to *sanskrit@cheerful.com*